# Sarasvatimantrakalpa

# સરસ્વતીમન્ત્રકલ્પઃ

## Document Information

Text title : sarasvatImantrakalpa

File name : sarasvatImantrakalpa.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Author : malliSheNAchArya

Transliterated by : DPD

Proofread by : DPD

Description/comments : Parishishta 11 of Bhairava Padmavati Kalpa, Jain/Gujarati publication, 1993

Latest update : August 3, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 3, 2020

*sanskritdocuments.org*

# સરસ્વતીમન્ત્રકલ્પઃ

અથ શ્રીમલ્લિષેણાચાર્યવિરચિતઃ  સરસ્વતીમન્ત્રકલ્પઃ ।

જગદીશં જિનં દેવમભિવન્દ્યાભિશઙ્ગરમ્ ।
વક્ષ્યે સરસ્વતીકલ્પં સમાસાયાલ્પમેધસામ્ ॥ ૧॥

અભયજ્ઞાનમુદ્રાક્ષમાલાપુસ્તકધારિણી ।
ત્રિનેત્રા પાતુ માં વાણી જટાબાલેન્દુમણ્ડિતા ॥ ૨॥

લબ્ધવાણીપ્રસાદેન મલ્લિષેણેન સૂરિણા ।
રચ્યત્તે ભારતીકલ્પઃ સ્વલ્પજાપ્યફલપ્રદઃ ॥ ૩॥

દક્ષો જિતેન્દ્રિયો મૌની દેવતારાધનોદ્યમી ।
નિર્ભયો નિર્મદો મન્ત્રી શાસ્ત્રેઽસ્મિન્ સ પ્રશસ્યતે ॥ ૪॥

પુલિને નિમ્નગાતીરે પર્વતારામસઙ્કુલે ।
રમ્યૈકાન્તપ્રદેશે વા હર્મ્યે કોલાહલોજ્ઝિતે ॥ ૫॥

તત્ર સ્થિત્વા કૃતસ્નાનઃ પ્રત્યૂષે દેવતાર્ચનમ્ ।
કુર્યાત્ પર્યઙ્ગયોગેન સર્વવ્યાપારવર્જિતઃ ॥ ૬॥

તેજોવદદ્વયસ્યાગ્રે લિખેદ્ વાગ્વાદિનીપદમ્ ।
તતશ્ચ પઞ્ચ શૂન્યાનિ પઞ્ચસુ સ્થાનકેષ્વપિ ॥ ૭॥

ૐ વદ વદ વાગ્વાદિની હ્રાઁ હૃદયાય નમઃ ।
ૐ વદ વદ વાગ્વાદિની હ્રીઁ શિરસે નમઃ ।
ૐ વદ વદ વાગ્વાદિની હ્રૂઁ શિખાયૈ નમઃ ।
ૐ વદ વદ વાગ્વાદિની હ્રૌઁ કવચાય નમઃ ।
ૐ વદ વદ વાગ્વાદિની હ્રઃ અસ્ત્રાય નમઃ ।
ઇતિ સકલીકરણ્ં વિધાતવ્યમ્ ।

રેફૈર્જ્વલદ્ભિરાત્માનં દગ્ધમગ્નિપુરસ્થિતમ્ ।

ધયાયેદમૃતમન્ત્રેણ કૃતસ્નાનસ્તતઃ સુધીઃ ॥ ૮॥

ॐ અમૃતે ! અમૃતોદ્ભવે ! અમૃતવર્ષિણિ !
અમૃતં શ્રાવય શ્રાવય સં સં હ્રીં હ્રીં ક્લીઁ
કલીઁ બ્લૂઁ બ્લૂઁ દ્રાં દ્રાં દ્રીં દ્રીં દ્રૂં દ્રૂં દ્રાવય દ્રાવય સ્વાહા ।

સ્નાનમન્ત્રઃ । વિનયમહા ।
ॐ હ્રીં પદ્મયશસે યોગપીઠાય નમઃ ।

પીઠસ્થાપનમન્ત્રઃ ।
પટ્ટકેऽષ્ટદલામ્ભોજં શ્રીખણ્ડેન સુગન્ધિના ।
જાતિકાસ્વર્ણલેખિન્યા દૂર્વાદર્ભેણ વા લિખેત્ ॥ ૯॥

ઓઙ્કારપૂર્વાણિ નમોન્તગાનિ શરીરવિન્યાસકૃતાક્ષરાણિ ।
પ્રત્યેકતોऽષ્ટૌ ચ યથાક્રમેણ દેયાનિ તાન્યષ્ટસુ પત્રકેષુ ॥ ૧૦॥

બ્રહ્મહોમનમઃશબ્દં મધ્યેકર્ણિકમાલિખેત્ ।
કં કઃ પ્રભૃતિભિર્વર્ણૈર્વેષ્ટયેત્ તન્નિરન્તરમ્ ॥ ૧૧॥

કં કઃ,ચં ચઃ, ટં ટઃ, તં તઃ પં પઃ, યં યઃ, રં રઃ,
લં લઃ, વં વઃ, શં શઃ, ષં ષઃ, સં સઃ, હં હઃ, લ્લં લ્લઃ,
ક્ષં ક્ષઃ, ખં ખઃ, છં છઃ, ઠં ઠઃ, થં થઃ, ફં ફઃ,
ગં ગઃ, જં જઃ, ડં ડઃ, દં દઃ બં બઃ, ઘં ઘઃ, ઝં ઝઃ,
ઢં ઢઃ, ધં ધઃ, ભં ભઃ, ઙં ઙઃ, ઞં ઞઃ, ણં ણઃ,
નં નઃ, મં મઃ, એતાનિ કેસરાક્ષરાણિ ।

બાહ્યે ત્રિર્માયયા વેષ્ટય કુમ્ભકેનામ્બુજોપરિ ।
પ્રતિષ્ઠાપનમન્ત્રેણ સ્થાપયેત્ તાં સરસ્વતીમ્ ॥ ૧૨॥

ॐ અમલે ! વિમલે ! સર્વજ્ઞે ! વિભાવરિ !
વાગીશ્વરિ ! જ્વલદીધિતિ ! સ્વાહા

પ્રતિષ્ઠાપનમન્ત્રઃ ॥

અર્ચયેત્ પરયા ભક્ત્યા ગન્ધપુષ્પાક્ષતાદિભિઃ ।
વિનયાદિનમોऽન્તેન મન્ત્રેણ શ્રીસરસ્વતીમ્ ॥ ૧૩॥

ॐ સરસ્વત્યૈ નમઃ ।
વિનયં માયાહરિવલ્લભાક્ષરં તત્પુરો વદદ્વિતયમ્ ।

વાગ્વાદિની ચ હોમં વાગીશા મૂલમન્ત્રોઽયમ્ ॥ ૧૪॥

ૐ હ્રીँ શ્રીँ વદ વદ વાગ્વાદિની સ્વાહા । મૂલમન્ત્રઃ ।

યો જપેજ્જાતિકાપુષ્પૈર્ભાનુસઙ્ખ્યસહસ્રકૈઃ ।
દશાંશહોમસંયુક્તં સ સ્યાદ્ વાગીશ્વરીસમઃ ॥ ૧૫॥

મહિષાક્ષગુગ્ગુલેન પ્રતિનિર્મિતચણકમાનસદ્ગુટિકાઃ ।
હોમસ્ત્રિમધુરયુક્તૈર્વરદાઽત્ર સરસ્વતી ભવતિ ॥ ૧૬॥

દેહશિરોદૃગ્નાસાસર્વમુખાનનસુકણ્ઠહૃન્નાભિ ।
પાદેષુ મૂલમન્ત્રબીજદ્વયવર્જિતં ધ્યાયેત્ ॥ ૧૭॥

શ્વેતામ્બરાં ચતુર્ભુજાં સરોજવિષ્ટરસ્થિતામ્ ।
સરસ્વતીં વરપ્રદામહર્નિશં નમામ્યહમ્ ॥ ૧૮॥

સાઙ્ખ્યભૌતિકચાર્વાકમીમાંસકદિગમ્બરાઃ ।
સૌગતાસ્તેઽપિ દેવિ ! ત્વાં ધ્યાયન્તિ જ્ઞાનહેતવે ॥ ૧૯॥

ભાનૂદયે તિમિરમેતિ યથા વિનાશં
ક્ષ્વેડં વિનશ્યતિ યથા ગરુડાગમેન ।
તદ્વત્ સમસ્તદુરિતં ચિરસઞ્ચિતં મે
દેવિ ! ત્વદીયમુખદર્પણદર્શનેન ॥ ૨૦॥

ગમકત્વં કવિત્વં ચ વાગ્મિત્વં વાદિતા તથા ।
ભારતિ ! ત્વત્પ્રસાદેન જાયતે ભુવને નૃણામ્ ॥ ૨૧॥

સરસ્વતીસ્તવઃ ।
જપકાલે નમઃશબ્દં મન્ત્રસ્યાન્તે નિયોજયેત્ ।
હોમકાલે પુનઃ સ્વાહા મન્ત્રસ્યાયં સદા ક્રમઃ ॥ ૨૨॥

સવૃન્તકં સમાદાય પ્રસૂનં જ્ઞાનમુદ્રયા ।
મન્ત્રમુચ્ચાર્ય સન્મન્ત્રી શ્વાસં મુઞ્ચતિ રેચનાત્ ॥ ૨૩॥

વાગ્ભવં કામરાજં ચ સાન્તં ષાન્તેન સંયુતમ્ ।
બિન્દ્વોઙ્કારયુતં મન્ત્રં ગ્વે પુરં તન્નિગદ્યતે ॥ ૨૪॥

ઐં ક્લીँ દૂ હ્સૌँ નમઃ ।
શ્વેતૈઃ પુષ્પૈર્ભવેદ્ વાચા શોણિતૈર્વશ્યમોહનમ્ ।
લક્ષજાપેન સંસિદ્ધિં યાતિ મન્ત્રં સહોમતઃ ॥ ૨૫॥

ઐં ક્લીઁ હ્સૌઁ મન્ત્રઃ ।
ઉષ્માણામાદિમં બીજં બ્રહ્મબીજસમન્વિતમ્ ।
લાન્તં રાન્તેન સંયુક્તં માયાવાગ્ભવબીજકમ્ ॥ ૨૬॥

સ્વલાઁ હ્રીં ઐં સરસ્વત્યૈ નમઃ ।
મન્ત્રં જપતિ યો નિત્યં જાતિકાકુસુમૈર્વરૈઃ ।
રવિસઙ્ખ્યસહસ્રાણિ સ સ્યાદ્ વાચસ્પતેઃ સમઃ ॥ ૨૭॥

સપ્ત લક્ષાણિ યો વિદ્યાં માયામેકાક્ષરીં જપેત્ ।
તસ્ય સિદ્ધ્યતિ વાગીશા પુષ્પૈરિન્દુસમપ્રભૈઃ ॥ ૨૮।
હ્રીં ઝં વં હ્વો જલભૂબીજૈર્નામ યત્ તત્ સ્વરૈર્વૃતમ્ ।
બાહ્યે દ્વિષડ્દલામ્ભોજપત્રેષુ સકલં નભઃ ॥ ૨૯॥

સાન્તં સમ્પુટમાલિખ્ય ઈંવી હંસૈર્વલયીકૃતમ્ ।
અમ્ભઃપુરપુટોપેતં સદ્ભૂર્જે ચન્દનાદિભિઃ ॥ ૩૦॥

સિક્થકેન સમાવેષ્ટ્ય જલપૂર્ણઘટે ક્ષિપેત્ ।
દાહસ્યોપશમં કુર્યાદ્ ગ્રહપીડાં નિવારયેત્ ॥ ૩૧॥ શાન્તિકયન્ત્રમ્ ।
નામ ત્રિમૂર્ત્તિમધ્યસ્થ ક્લીઁ ક્રૌઁ દિક્ષુ વિદિક્ષુ ચ ।
બહિર્વહ્નિપુટં કોષ્ઠેષ્વૌઁ જમ્ભે ! હોમમાલિખેત્ ॥ ૩૨॥

મોહાપિ ચ તથા ગ્રાન્તબ્રાહ્મબ્લૂઁકારમાસ્થિતમ્ ।
ૐ બ્લૈઁ ધાત્રે વષટ્ વેષ્ટદ્યાન્તર્બાહ્યે ક્ષિતિમણ્ડલમ્ ॥ ૩૩॥

ફલકે ભૂર્યપત્રે વા લિખિત્વા કુઙ્કુમાદિભિઃ ।
પૂજયેદ્ યઃ સદા યન્ત્રં સર્વ તસ્ય વશં જગત્ ॥ ૩૪॥

વશ્યયન્ત્રમ્ ॥

માન્તં નામયુતં દ્વિરેફસહિતં બાહ્યે કલાવેષ્ટિતં
તદ્બાહ્યેઽગ્નિમરુત્પરં વિલિખિતં તામ્બૂલપત્રોદરે ।
લેખિન્યાન્યમૃતાક્ષકણકભુવાર્કક્ષીરરાજીપ્લુતં
તપ્તં દીપશિખાગ્નિના ત્રિદિવસે રમ્ભામપીહાનયેત્ ॥ ૩૫॥

રેફદ્વયેન સહિતં લિખ માન્તયુગ્મં ષષ્ઠસ્વરચતિર્દશબિન્દુયુક્તમ્ ।
બાહ્યે ત્રિવહ્નિપુરમાલિખ ચૈતદન્તઃ
પાશત્રિમૂર્ત્તિગજવશ્યકરૈશ્ચ વેષ્ટ્યમ્ ॥ ૩૬॥

પુરં હિરણ્યરેતસો વિલિખ્ય તદ્બહિઃ પુનઃ ।

કરોતુ મન્ત્રવેષ્ટનં તતોઽગ્નિવાયુમણ્ડલમ્ ॥ ૩૭॥

તદ્યથા -
ૐ આઁ હ્રીં ક્રૌઁ મ્લ્વ્યગ્યૂં જમ્ભે ! મોહે ! ૨૨૨૨ ઘે ઘે સર્વાઙ્ગં
દહ દહ દેવદત્તાયા હૃદયં મમ વશ્યમાનય હ્રીં યં વૌષટ્ ॥

તં તામ્બૂલરસેન હેમગરલબ્રહ્માદિભિઃ સગ્યુજા
પ્રેતાવાસનકર્પરૈઃ પ્રવિલિખેત્ તામ્રસ્ય પત્રેઽથવા ।
અઙ્ગારૈઃ ખદિરોદ્ભવૈઃ પ્રતિદિનં સન્ધ્યાસુ સન્તાપયેત્
સપ્તાહાત્ વનિતાં મનોઽભિલષિતાં મન્ત્રી હઠાદાનયેત્ ॥ ૩૮॥

સંલિખ્યાષ્ટદલાબ્જમધ્યગગનં કામાધિપેનાવૃતં
તત્પત્રેષુ તદક્ષરં પ્રવિલિખેદ્ પત્રાગ્રતોઽગ્ન્યક્ષરમ્ ।
બ્લેં પત્રાન્તરપૂરિતં વલયિતં મન્ત્રેણ વામાદિના
દ્રાં દ્રીં બ્લૂં સ્મરવીજહોમસહિતેનૈતજ્જગત્ક્ષોભણમ્ ॥ ૩૯॥

જાપ્યઃ સહસ્રદશકં સુભગાયોનાવલક્તકં ધૃત્વા ।
વિદ્યા નવાક્ષરીયા તયાપસવ્યેન હસ્તેન ॥ ૪૦॥

ૐ હ્રીં આઁ ક્રૌઁ હ્રીં ક્ષીઁ હ્રીં ક્લીઁ બ્લૂઁ દ્રાં દ્રીં
ૐ કામિની રઞ્જય હોમમન્ત્રં યસ્યા લિખેચ્ચાત્મકરેઽપસવ્યે ।
સન્દર્શયેત્ સા સ્મરબાણભિન્નાઽદ્ભુતં ભવત્યત્ર કિમસ્તિ ચિત્રમ્ ॥ ૪૧॥

વિનયં ચલે ચલચિત્તે રતૌ મુઞ્ચયુગ્મં હોમમ્ ।
દ્રાવયત્યબલાં બલાલ્લક્ષેણૈકેન જાપ્યેન ॥ ૪૨॥

સિન્દૂરસન્નિભં પિણ્ડમૈવલક્ષરનિર્મિતમ્ ।
ધ્યાતં સબિન્દુકં યોન્યાં દ્રાવયત્યબલાં બલાત્ ॥ ૪૩॥

સમ્પિષ્ટોતમિકામૂલં જલશૌચં સ્વરેતસા ।
ભર્તુર્દદાતિ યા ષણ્ઢે સાન્યાં પ્રતિકરોતિ તમ્ ॥ ૪૪॥

મર્દયેત્ પિપ્પલાકામં સૂતકેન કુરુણ્ટિકા ।
ક્ષીરેણ મધુના સાર્ધં લિઙ્ગલેપોઽબલાસ્મરઃ ॥ ૪૫॥

મધુકર્પૂરસૌભાગ્યં પિપ્પિલીકામસંયુતમ્ ।
દ્રાવયત્યઙ્ગનાદર્પં લિઙ્ગલેપનમાત્રતઃ ॥ ૪૬॥

એરણ્ડતેલં ફણિકૃત્તિયુક્તં સન્માતુલિઙ્ગસ્ય ચ બીજમિશ્રમ્ ।

ધૂપં ચ દદ્યાદ્રતિહર્મ્યમધ્યે સ્ત્રીમોહનં જ્ઞાનવિદો વદન્તિ ॥ ૪૭॥

ક્લીઁકારકારરુદ્ધં લિખ કૂટપિણ્ડં નામાન્વિતં દ્વાદશપત્રપદ્મમ્ ।
બ્રહ્માદિહોમાન્તપદેન યુક્તાઃ પૂર્વાદિપત્રેષુ જયાદિદેવ્યઃ ॥ ૪૮॥

ૐ જયે સ્વાહા । ૐ વિજયે સ્વાહા ।
ૐ અજિતે સ્વાહા । ૐ અપરાજિતે સ્વાહા
જભમહપિણ્ડસમેતા જમ્ભાદ્યાઃ પ્રણવપૂર્વહોમાન્તાઃ ।
વિદિગ્દલેષુ યોજ્યાઃ સ્મરબીજં શેષપત્રેષુ ॥ ૪૯॥

ૐ જમ્બ્લ્વ્ર્યૂં જમ્ભે ! સ્વાહા ! ૐ ભ્મ્લ્વ્ર્યૂઁ મોહે !
સ્વાહા । ૐ મ્મ્લ્વ્ર્યૂઁ સ્તમ્ભે ! સ્વાહા ।
ૐ હ્મ્લ્વ્ર્યૂઁ સ્તમ્ભિની સ્વાહા । શેષપત્રેષુ ક્લીઁ ।

ત્રિધા માયયા વેષ્ટિતં ક્રૌઁનિરુદ્ધં
    લખેદ્ રોચનનાકુઙ્કુમૈર્ભૂયપત્રે ।
મધુસ્થાપિતં વેષ્ટિતં રક્તસૂત્રૈ-
    ર્વશં યાતિ રમ્ભાપિ સપ્તાહમધ્યે ॥ ૫૦॥

ક્લીઁ રઞ્જિકા ॥ ૧॥

યન્ત્રં તદેવ વિલિખેદ્ વનિતાકપાલે
    ગોરોચનાદિભિરનઙ્ગપદે ત્રિમૂર્ત્તિમ્ ।
સન્ધ્યાસુ સપ્તદિવસં ખદિરાગ્નિતપ્તં
    દેવાઙ્ગનામપિ સમાનયતીહ નાકાત્ ॥ ૫૧॥

હ્રીં રઞ્જિકા ॥ ૨॥

સ્થાને ત્રિમૂર્તેર્લિખ વિશ્વબીજં
    કસ્તૂરિકાદ્યૈર્વરભૂર્જપત્રે ।
બાહ્યે વૃતં રૂપપતઙ્ગવેષ્ટ્યં
    સીમન્તિનીનાં વિદધાતિ મોહમ્ ॥। ૫૨॥

ઈરઞ્જિકા ॥ ૩॥

વિષ્ણોઃ પદે સમભિયોજય રોષબીજં
    માનુષ્યચર્મણિ વિષેણ સલોહિતેન ।
કુણ્ડે પ્રપૂર્ય ખદિરજ્વલનેન તપ્તં
    શત્રોરકાલમરણં કુરુતેઽવિકલ્પાત્ ॥ ૫૩॥

હૂંરઞ્જિકા ॥ ૪॥

ભૂર્જેઽરુણેન સવિષેણ મકારબીજં હૂં
　　સ્થાનકે લિખ મલીમલમૂત્રવેષ્ટ્યમ્ ।
મૃત્પાત્રિકોદરગતં નિહિતં શ્મશાને
　　દુષ્ટસ્ય નિગ્રહમિદં વિદધાતિ યન્ત્રમ્ ॥। ૫૪॥

મઃ ॥ ૫॥

યન્ત્રં વિભીતફલકે વિષલોહિતાભ્યાં
મઃ સ્થાનકેઽગ્નિમરુતોઃ પ્રવિલિખ્ય બીજમ્
સંવેષ્ટ્ય વાજિમહિષોદભવકેશપાશૈઃ
પ્રેતાલયસ્થમચિરેણ કરોતિ વૈરમ્ ॥ ૫૫॥

ર્યઃ ॥ ૬॥

અનનપવનવીજે વાયુબીજં સસૃષ્ટિં,
　　ચિતિજગરલકાકામધ્યયુક્તૈર્વિલિખ્યમ્ ।
ગગનગમનપક્ષેણોદ્યખણ્ડે ધ્વજાનાં
　　પવનહૃતમરાત્યુચ્ચાટનં તદ્ વિદધ્યાત્ ॥ ૫૬॥

યઃ ॥ ૭॥

સ્વલ્પેન માનુષભુવા નૃકપાલયુગ્મે
　　પૂર્વોદિતાક્ષરપદે વિલિખેત્ સ્વબીજમ્ ।
ક્ષ્વેડારુણેન મૃતકાલયભસ્મપૂર્ણે
　　પ્રોચ્ચાટયેદરિકુલં નિહિતં શ્મશાને ॥। ૫૭।

હઃ ॥ ૮॥

પ્રેતામ્બરે વ્યોમપદે વિલેખ્યં ફ્ડક્ષરં નિમ્બનૃપાર્કક્ષીરૈઃ ।
સિદ્ધાલયે તન્નિખનેત્ ક્ષપાયાં બમ્ભ્રમ્યતે કાક ઇવારિરુર્વ્યામ્ ॥ ૫૮॥

ફટ્ ॥ ૯॥

કૂટં ફ્ડક્ષરપદે લિખ કુઙ્કુમાદ્યૈ-
　　ર્ભૂર્યે વષટ્પદયુતં મઠિતં ત્રિલોહૈઃ ।
પુંસાં સ્વબાહુકટિકેશગલે ધૃતાનાં
　　સૌભાગ્યકૃદ્ યુવતિભૂપતિવશ્યકારિ ॥ ૫૯॥

ક્ષ વષટ્ ॥ ૧૦॥

ક્ષસ્થાનકેઽથ લિખિતં હરિતાલકાદ્યૈ-
રિન્દ્રં શિલાતલપુટે ક્ષિતિમણ્ડલસ્થમ્ ।
સૂત્રેણ તત્ પરિવૃતં વિધૃતં ધરાયાં
કુર્યાત્ પ્રસૂતિમુખદિવ્યગતેર્નિરોધમ્ ॥ ૬૦॥

લમ્ ॥ ૧૧॥

રઞ્જિકા દ્વાદશયન્ત્રોદ્ધારઃ ॥

અજપુટે લિખેન્નામ ગ્લાં ક્ષં પૂર્ણેન્દુવેષ્ટિતમ્ ।
વજ્રાષ્ટકપરિચ્છિન્નમગ્રાન્તબ્રાહ્મણાક્ષરમ્ ॥ ૬૧॥

તદ્બાહ્યે ભૂપુરં લેખ્યં શિલાયાં તાલકાદિના ।
કોપાદિસ્તમ્ભનં કુર્યાત્ પીતપુષ્પૈઃ સુપૂજિતમ્ ॥ ૬૨॥

ૐ ગ્લૌં ક્ષં ઠ લં સ્વાહા ।
સંલિખ્ય નામાષ્ટદલાબ્જમધ્યે
માયાવૃતં ષોડશસત્કલાભિઃ ।
ક્લીઁ બ્લૂઁ તથા દ્રામથ યોજયિત્વા
દિક્સ્થેષુ પત્રેષુ સદા ક્રમેણ ॥ ૬૩॥

હોમં લિખેદઙ્કુશબીજમુચ્ચૈઃ
કિઞ્ચાન્યપત્રેષુ બહિસ્ત્રિમૂર્ત્તિઃ ।
ભૂર્જે હિમાદ્યૈર્વિધૃતં સ્વકણ્ઠે
સૌભાગ્યવૃદ્ધિં કુરુતેઽઙ્ગનાનામ્ ॥ ૬૪॥

સૌભાગ્યરક્ષા ॥

ક્ષજભમહરેફપિણ્ડૈઃ પાશાઙ્કુશબાણરઞ્જિકાયુક્તૈઃ ।
પ્રણવાદ્યૈઃ કુરુ મન્ત્રિન્ । ષટ્ કર્માણ્યુદયમવગમ્ય ॥ ૬૫॥

ૐ ક્ષ્મ્લ્વ્ર્યૂં જ્મ્લ્વ્ર્યૂં બ્મ્લ્વ્ર્યૂં મ્મ્લ્વ્ર્યૂં હ્મ્લ્વ્ર્યૂં ડ્મ્લ્વ્ર્યૂં
આઁ ક્રોઁ હ્રીઁ ક્લીઁ બ્લૂઁ
દ્રીં દ્રીં સંવૌષટ્ ત્રિભુવને સારઃ । સહસ્ર ૧૨ જપઃ ।
દશાંશેન હોમઃ ॥

વશ્યવિદ્વેષણોચ્ચાટે પૂર્વમધ્યાપરાણ્હકે ।
સન્ધ્યાર્ધરાત્રરાત્ર્યન્તે મારણે શાન્તિપૌષ્ટિકે ॥ ૬૬॥

વષડ્ વશ્યે ફડુચ્ચાટે હું દ્વેષે પૌષ્ટિકે સ્વધા ।
સંવૌષડાકર્ષણે સ્વાહા શન્તિકેઽવ્યથ મારણે ॥ ૬૭॥

પીતારુણાસિતૈઃ પુષ્પૈઃ સ્તમ્ભનાકૃષ્ટિમારણે ।
શાન્તિપૌષ્ટિકયોઃ શ્વેતૈર્જપેન્મન્ત્રં પ્રયત્નતઃ ॥ ૬૮॥

કુર્યાદ્ હસ્તેન વામેન વશ્યાકર્ષણમોહનમ્ ।
શેષકર્માણિ હોમં ચ દક્ષિણેન વિચક્ષણઃ ॥ ૬૯॥

ઉદધીન્દ્રમારુતાન્તકનૈરૃતકુબેરદિક્ષુ કૃતવદનઃ ।
શાન્તિકરોધોચ્ચાટનમારણસમ્પુષ્ટિજનવશ્યે ॥ ૭૦॥

શાન્તિપુષ્ટૌ ભવેદ્ધોમો દૂર્વાશ્રીખણ્ડતણ્ડુલૈઃ ।
મહિષાક્ષરઙ્ગામ્ભોજૈઃ પુરક્ષોભો નિગદ્યતે ॥ ૭૧॥

કરવીરારુણૈઃ પુષ્પૈરઙ્ગનાક્ષોભમુત્તમમ્ ।
હોમૈઃ ક્રમુકપત્રાણાં રાજવશ્યં વિધીયતે ॥ ૭૨॥

ગૃહધૂમનિમ્બપત્રૈર્દ્વિજપક્ષૈર્લવણરાજિકાયુક્તૈઃ ।
હુતૈસ્ત્રિસન્ધ્યવિહિતૈર્વિદ્વેષો ભવતિ મનુજાનામ્ ॥ ૭૩॥

પ્રેતાલયાસ્થિખણ્ડૈર્બિમ્ભીતકાઙ્ગારસમધૂમયુતૈઃ ।
સપ્તાહવિહિતહોમૈરરાતિમરણં બુધૈર્દિષ્ટમ્ ॥ ૭॥

નૈવેદ્યદીપાદિભિરિન્દ્રસઙ્ખ્યૈઃ સુવર્ણપાદાવભિપૂજ્ય દેવ્યાઃ ।
સ્વવામદેશસ્થિતસવ્યહસ્તો મન્ત્રી પ્રદદ્યાત્ સહિરણ્યમમ્ભઃ ॥ ૭૫॥

વિદ્યા મયેયં ભવતે પ્રદત્તા ત્વયા ન દેયાન્યદૃશે જનાય ।
તચ્ શ્રાવયિત્વા ગુરુદેવતાનામગ્રેષુ વિદ્યા વિધિના પ્રદેયા ॥ ૭૬॥

આજ્ઞાક્રમઃ

કૃતિના મલ્લિષેણેન જિનસેનસ્ય સુનુના ।
રચિતો ભારતીકલ્પઃ શિષ્ટલોકમનોહરઃ ॥ ૭૭॥

સૂર્યાચન્દ્રમસૌ યાવન્મેદિનીભૂધરાર્ણવાઃ ।
તાવત્ સરસ્વતીકલ્પઃ સ્થેયાચ્ચેતસિ ધીમતામ્ ॥ ૭૮॥

શ્રીમલ્લિષેણસારસ્વતવિધિરયમ્ -

પ્રથમઃ કૃતસ્નાનઃ સમૌનઃ પ્રાતઃ શ્રીભારત્યાઃ પૂજાં કૃત્વા
વિહિતાર્કક્ષારોદનઃ તતોઽનન્તરં સન્ધ્યાસમયે પુનઃ સ્નાત્વા
સર્વવ્યાપારવર્જિતો ભૂત્વા શુચિઃ શ્વેતં વસ્તુ ધ્યાયેત્ ।

ૐ હ્રઃ ભૂરિસી ભૂતધાત્રી ભૂમિશુદ્ધિં કુરુ કુરુ સ્વાહા ।
ભૂમિશુદ્ધિમન્ત્રઃ ।
ૐ હ્રીં વાં નમો અરિહન્તાણં અશુચિઃ શુચીભવામિ સ્વાહા ।

આત્મશુદ્ધિમન્ત્રઃ ॥

ૐ હ્રીઁ વદ વદ વાગ્વાદિની હ્રીઁ હૃદયાય નમઃ । હ્રીઁ શિરસે નમઃ ।
હ્રૂઁ શિખાયૈ નમઃ । હ્રૌઁ કવચાય નમઃ । હ્રઃ અસ્ત્રાય નમઃ ।
ઇતિ સકલીકરણં વિધાતવ્યમ્ ।

તતોઽમૃતમન્ત્રેણ સરસ્વત્યાઃ પૂજા ક્રિયતે ।
ૐ અમૃતે ! અમૃતોદ્ભવે ! અમૃતવર્ષિણિ !
અમૃતવાહિનિ ! અમૃતં શ્રાવય શ્રાવય
ઐઁ ઐઁ ક્લીઁ ક્લીઁ બ્લૂઁ [ બ્લૂઁ ] દ્રાં દ્રીં દ્રાવય દ્રાવય સ્વાહા ।
અથ મણ્ડલસ્થાપના વિધીયતે-
ૐ હ્રીં મહાપદ્મયશસે યોગપીઠાય નમઃ પીઠસ્થાપનમન્ત્રઃ ॥

અથ હ્રીં અમલે ! વિમલે ! સર્વજ્ઞે ! વિભાવરિ !
વાગીશ્વરિ ! કલમ્બપુષ્પિણિ સ્વાહા ।
પ્રતિષ્ઠામન્ત્રઃ
તતો મણ્ડલપૂજા વિધીયતે । અ સરસ્વત્યૈ નમઃ । પૂજામન્ત્રઃ ।
મણ્ડલાગ્રેઽગ્નિકુણ્ડં સમચતુરસ્રં વિધીયતે અઙ્ગલ ૧૬
પ્રમાણમ્ । તતો મૂલમન્ત્રેણ જાપ ૧૨૦૦૦। તતો દશાંશેન હોમઃ ।
ગુગ્ગુલ-મધુ-ઘૃત-પુષ્પસહિતગુટિકા ચનકપ્રમાણા ૧૨૦૦૦
હોમઃ પિપ્પલપલાશશમિસમિધૈઃ । મૂલમન્ત્રેણ કરજાપલક્ષ ૧૦૦૦૦૦।
તતઃ સિદ્ધિઃ ।

॥ ઇતિ શ્રીમલ્લિષેણાચાર્યવિરચિતઃ સરસ્વતીમન્ત્રકલ્પઃ સમાપ્તઃ ॥

Encoded and proofread by DPD

*Sarasvatimantrakalpa*

pdf was typeset on August 3, 2020

Please send corrections to *sanskrit@cheerful.com*